ISSN 2320-5911

# प्रज्ञालोकः



रामकृष्णमिशन-विवेकानन्द-विश्वविद्यालयः
वेलुडमठः



ISSN 2320-5911
9 772320 591001 >

# योगसूत्रोक्तः एकतत्त्वाभ्यासः- एकः विमर्शः

## (योगसूत्राणां साम्प्रदायिकव्याख्यानां परिशीलनेन कृतमध्ययनम् )

म. जयरामः*

## १. उपोद्घातः

योगशास्त्रं जगते भारतस्य विशिष्टं योगदानम् इति परिगण्यते। योगशास्त्रस्यानुवक्ता मुनिः पतञ्जलिः। तेन प्रणीतानि योगसूत्राण्येव योगशास्त्रस्य आधारग्रन्थः। तेषु योगसूत्रेषु मनसः प्रशमनाय, चित्तवृत्तिनिरोधाय अनेके उपायाः कथिताः। तत्र योगसूत्राणां प्रथमे पादे द्वात्रिंशं सूत्रं 'तत्प्रतिषेधार्थम् एकतत्त्वाभ्यासः' इति। अस्मिन् सूत्रे चित्तविक्षेपाणां निवारणार्थम् एकतत्त्वाभ्यासः इत्येकः मुख्यः योगोपायः सूचितः। तत्र एकतत्त्वाभ्यासो नाम कः इति विषये विवदन्ति विद्वांसः। योगसूत्रस्य उपलभ्यमानासु अनेकासु टीकासु व्याख्यानेषु च एकतत्त्वाभ्यासस्य अर्थविषये ऐकमत्यं न वर्तते। अतः तस्य अर्थनिर्णयः प्रमुखस्य अस्य योगोपायस्य अनुष्ठाने सौकर्यं कल्पयेदिति विभाव्य तद्विषये विचारः अस्मिन् लेखे प्रवर्त्यते।

## २. विचारसङ्गतिः

योगसूत्रेषु नव चित्तविक्षेपाः[1] उल्लिखिताः ये च योगमार्गे अन्तरायाः इति कथितं सूत्रकारेण। तत्सहभुवामपि आवलिः प्रदत्ता तत्रैव[2] तेषां प्रतिषेधाय पतञ्जलिना सूत्रितं- तत्प्रतिषेधार्थम् एकतत्त्वाभ्यासः[3] इति। अन्तरायाणां तत्सहभुवां च प्रतिषेधाय एकतत्त्वाभ्यासः कर्तव्यः इति सामान्यतः सूत्रस्य अस्य अर्थः। एकतत्त्वाभ्यास इत्यत्र एकं, तत्त्वम्, अभ्यासः इति त्रीणि पदानि वर्तन्ते। चित्तविक्षेपाणाम् उपशमनाय एकस्य एव तत्त्वस्य चित्ते अभ्यासः, आवृत्तिः कर्तव्या इति तु स्पष्टमस्ति। किन्तु किं तत् एकं तत्त्वमिति जिज्ञासा वर्तते। सूत्रे एतद्विषये न काऽपि सूचना वर्तते। अतः व्याख्याः शरणीकरणीयाः सूत्रस्यास्यार्थावबोधाय।

## ३. व्याख्यानाम् अभिप्रायाः

योगसूत्राणां प्रधानं व्याख्यानमस्ति व्यासप्रणीतं 'साङ्ख्यप्रवचन'भाष्यम्। तदुपरि

---

*उपनिर्देशकः, संशोधनविभागस्य, कृष्णमाचार्ययोगमन्दिरे चेन्नैस्थे

[1] व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्त्वानि चित्तविक्षेपास्तेऽन्तरायाः यो.सू.१.३०

[2] दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः यो.सू.१.३१

[3] यो.सू.१.३२

अनेका व्याख्या रचिता वाचस्पति-विज्ञानभिक्षु-भोज-हरिहरानन्दारण्यप्रभृतिभिः। सदाशिव-ब्रह्मेन्द्रेणापि योगसुधाकराख्या एका स्वतन्त्रा व्याख्या कृता वर्तते। एषु ग्रन्थेषु एकतत्त्वाभ्यास-विषये किमुक्तमस्तीति परिशील्यते अधुना।

## ३.१. व्यासः

'विक्षेपप्रतिषेधार्थम् एकतत्त्वालम्बनं चित्तमभ्यसेत्' इत्येतावन्मात्रं कथितमस्ति व्यासेन एकतत्त्वाभ्यासविषये। अग्रे च व्यासभाष्ये चित्तस्वरूपविषये बौद्धानां विचारखण्डनं विधीयते। विक्षेपस्य प्रतिषेधः यदि कर्तव्यः एकस्य एव तत्त्वस्य (न तु अनेकेषां) अभ्यासः कर्तव्यः येन चित्तं विक्षेपरहितं कर्तुं शक्यते इत्ययमभिप्रायः व्यासवचनात् अवगम्यते। किं तद् एकतत्त्वमिति व्यासेन न प्रपञ्चितम्।

व्यासस्य वचनप्रपञ्चार्थानाम् उपव्याख्यानां विचाराः अत्र प्रस्तूयन्ते।

### ३.१.१. वाचस्पतिमिश्रः[4]

'एकतत्वम् ईश्वरः प्रकृतत्वात्'। व्यासवचनस्य विवरणम् ईश्वरः, प्रकृतत्वात् इति पदाभ्यां करोति वाचस्पतिमिश्रः। अस्याभिप्राये तद् एकं तत्त्वम् ईश्वरः। तस्य विषय एव उपक्रान्त ईश्वरप्रणिधानाद्वा[5] इत्येतस्मात् सूत्रादारभ्य ततः प्रत्यक्चेतनाधिगमः अप्यन्तरायाभावश्च[6] इत्येतत्सूत्रावधि। अतः तद् एकं तत्त्वम् ईश्वर एव भवितुमर्हति इति वाचस्पतिमिश्रस्य आशयः।

### ३.१.२ भोजः[7]

एकस्मिन् कस्मिंश्चित् अभिमते तत्त्वे अभ्यासः चेतसः पुनः पुनः निवेशनं कार्यम्।' अत्र भोजमतानुगुणम् अभिमतं यत्किञ्चिद्वस्तु एकतत्त्वं भवितुमर्हति यस्य विषये चेतः पुनः पुनः निवेशनीयं भवेत् विक्षेपनिवृत्त्यर्थम् इत्ययमर्थः पर्यवस्यति।

### ३.१.३ विज्ञानभिक्षुः[8]

'एकं स्थूलादि किञ्चित्। यत्तु एकतत्त्वशब्देन परमेश्वर एव उक्त इति तत् न। बाधकं विना सामान्यशब्दस्य विशेषपरत्वानौचित्यात्, पूर्वसूत्रप्राप्तत्वेन पौनरुक्त्यापत्तेश्च। सर्वमेव चित्तमेकाग्रं, नास्त्येव विक्षिप्तम् इति आगामिभाष्यानुपपत्तेश्च'।

---

[4]अनेन तत्ववैशारदी इति व्याख्या प्रणीता व्यासभाष्यस्योपरि
[5]यो.सू.१.२३
[6]यो.सू.१.२९
[7]भोजवृत्त्याख्या राजमार्तण्डापरनामधेया व्याख्या भोजेन प्रणीता व्यासभाष्यस्योपरि
[8]योगवार्त्तिकाख्या व्याख्या विज्ञानभिक्षुणा प्रणीता

अस्य अभिप्रायः भोजस्य मतस्य अनुसरणं करोति। अनेन एकतत्त्वं स्थूलत आरभ्य यत् किञ्चिदपि ध्येयं वस्तु भवितुमर्हति इति सिद्धं भवति। पुनश्च मुक्तकण्ठतया ईश्वरः एकतत्त्वपदवाच्यः न भवति इत्यपि कथितम्। तदर्थञ्च त्रयो हेतव उपन्यस्ताः।

१) सामान्यशब्दस्य बाधकमन्तरा विशेषार्थपरत्वाशक्यत्वम्- एकतत्त्वमिति पदं यत् किञ्चिद् एकं तत्त्वम् इत्येव बोधयति। यदि तद् ईश्वरपरतया एव स्वीकरणीयं तर्हि तत्र सामान्यार्थस्वीकारबाधकं किञ्चित् कारणं दर्शनीयं भवेत्। अस्मिन् प्रसङ्गे तादृशं बाधकं नास्ति किमपि। अतः तत्त्वसामान्यबोधकस्य तत्त्वपदस्य ईश्वर इति विशेषार्थपरत्वं न साध्यमिति विज्ञानभिक्षुणा विचार उपस्थापितः।

२) पौनरुक्त्यं- पूर्वसूत्रेषु विवृतस्य ईश्वरस्य, तदभ्यासस्य च विषये एव पुनरत्रापि अनुवर्त्यते इति चेत् नूतनं किञ्चिदत्र नास्ति इति सिद्धं भवति, अयं च शास्त्रे दोषत्वेन परिगणितः।

३) तृतीयं च कारणम् उच्यते आगामिभाष्यानुपपत्तेश्च इति- व्यासभाष्यस्य अग्रिमे भागे बौद्धानां विचारः खण्ड्यते। बौद्धानाम् अयमस्ति विचारः यत्- सर्वमेव वस्तु क्षणिकं चित्तमप्यन्तर्भाव्य। प्रतिक्षणं विनश्यत् चित्तं यत्किञ्चिद् एकं वस्तु चिन्तयदेव विलीनं भवति। अतः चित्तं सर्वदापि एकाग्रमेव भवति। तेन चित्तविक्षेपप्रसक्तिरेव नास्ति। अतः नास्ति बौद्धपक्षे ध्यानादीनामवसर इति खण्ड्यते व्यासेन। तदिदं वचनं प्रकृते प्रसङ्गे अपि अन्वितं भवेत् इत्यभिप्रैति विज्ञाभिक्षुः। तद्यथा- ईश्वरस्याभ्यासः समाहितचित्तैः अनुष्ठातृभिः एव कर्तुं शक्यः, ईश्वरतत्त्वस्य सूक्ष्मत्वात्। यदि अनुष्ठातारः समाहितचित्ताः तदैव ईश्वराभ्यासरूपे एकतत्त्वाभ्यासे तेषां प्रवृत्तिः भवेदिति वक्तुं युक्तं स्यात्। यदि अनुष्ठातारः समाहितचित्ताः तर्हि चित्तविक्षेपः एव नास्ति तेषामित्यर्थः। अतश्च एकतत्त्वाभ्यासादीनाञ्च आवश्यकतापि न भवति। एवञ्च बौद्धानां यथा तथा अत्रापि ध्यानादीनामप्रसक्तिरूपः दोषः भवति इत्ययमाशयः विज्ञानभिक्षोः। अत एकतत्त्वपदं न ईश्वरबोधकम् इत्येनं विषयं हेतुत्रयविन्यासेन स्फुटं निराकरोति विज्ञानभिक्षुः।

## ३.१.४ हरिहरानन्द-आरण्यः[9]

यस्मिन् ध्येयविषये एकतत्त्वात्मकं न अनेकेषु भावेषु विचरणस्वभावकं तादृशविषयकं चित्तमभ्यसेत्। ईश्वरप्रणिधाने आदौ चित्तमनेकेषु विषयेषु विचरति। यथा- यः क्लेशादिरहितो यः सर्वज्ञो यः सर्वव्यापीत्यादिषु भावेषु सञ्चरणं नैकतत्त्वालम्बनता चेतसः। अभ्यासबलात् तान् सर्वान् समाहृत्य यद् एकस्वरूपध्येयालम्बनं चित्तं क्रियते तदा तादृशाभ्यासात् कायेन्द्रियस्थैर्यं क्षिप्रं प्रवर्तते। ततश्च विक्षेपा दूरीभवन्ति। एकतत्त्वालम्बनाय अहंभावः श्रेष्ठो विषयः।...

आरण्यवर्यस्य अभिमतेन अपि एकतत्वम् ईश्वर एव। अथापि ईश्वरविषयक एक

[9]भास्वती इत्यस्ति नाम हरिहरानन्द-आरणयस्य व्यासभाष्यव्याख्याया नाम

एव विचारो ध्येयः। अहमेव ईश्वरः इति विभावयन् स्वात्मनः क्लेशकर्मादिशून्यतां चिन्तयन् कायेन्द्रियाणां स्थैर्यं विन्देद् इति स्वस्य एकतत्त्वाभ्यासविषयकम् अभिप्रायं प्रकटयति सः।

### ३.१.५ सदाशिवब्रह्मेन्द्रः

'एकतत्त्वस्य ईश्वरस्य अभ्यासः कर्तव्यः। पूर्वोक्तम् ईश्वरप्रणिधानमेव अस्मिन् अंशे स्मार्यते।' सदाशिवब्रह्मेन्द्रः स्वस्य स्वतन्त्रायां (पूर्वोद्धृताः अन्याः सर्वाः व्याख्याः व्यासभाष्यस्य टीकाः) योगसुधाकरवृत्त्यां वाचस्पतिमिश्रस्य मतमेव उपष्टम्भयति। अपि च विस्पष्टमपि एकतत्त्वाभ्यास ईश्वरप्रणिधानमेव इति कथयति इत्यवधेयम्।

## ४. विचारविमर्शः

सर्वेऽपि पूर्वोल्लिखिता आचार्या ज्ञानिनः अनुष्ठातारः च एव। तेषां विचाराः साधव एव स्युः तत्तदनुभूत्यनुगुणम्। तथापि प्रसङ्गस्य परिशीलनेन, व्याख्यानां च परामर्शेन च एकतत्त्वाभ्यासः नाम क इति अवश्यमेव चिन्तनीयं भवेत् सर्वेणापि चित्तविक्षेपैः मोमुह्यमानेन योगानुष्ठात्रा स्वबोधशुद्धये ततः अनुष्ठाने प्रवृत्तये च। अतः तद्दिशि यथामति चिन्तनं विधीयते।

पूर्वोल्लिखिता व्याख्या एवं वर्गीकर्तुं शक्यन्ते

१) यस्य कस्यचन अभिमतस्य वस्तुनः एकाग्रतया ध्यानमेव एकतत्त्वाभ्यासः(व्यासः, भोजः)

२) एकतत्त्वाभ्यासः नाम ईश्वरप्रणिधानमेव। (सदाशिवब्रह्मेन्द्रः)

३) एकतत्त्वाभ्यास ईश्वरध्यानमेव किन्तु, तद् एकविचारयुक्तमेव भवेत्- यथा अहमेव ईश्वर इति। (हरिहरानन्द-आरण्यः)

४) एकतत्त्वाभ्यासः स्थूलादेः कस्यचनापि वस्तुनः ध्यानम्। ईश्वरः एकतत्त्वं भवितुं नार्हति। (विज्ञानभिक्षुः)

५) एकतत्त्वम् ईश्वरः (तत्र एक-पदस्य औचित्यं किमिति न प्रपञ्चितम्, स च अभ्यासः कथं कार्य इत्यपि न प्रपञ्चितम्) (वाचस्पतिमिश्रः)

अतः अत्र परस्परं विरुद्धौ द्वौ पक्षौ दृश्येते।

१.एकतत्त्वाभ्यास ईश्वरप्रणिधानमेव नान्यत् (सदाशिवब्रह्मेन्द्रमतम्)

२. एकतत्त्वाभ्यासः अन्य एव, ईश्वरप्रणिधानं तु सर्वथा न (विज्ञानभिक्षोः मतम्) इति साक्षाद् विरुद्धौ द्वौ पक्षौ आदौ परिशील्येते।

### ४.१ एकतत्त्वाभ्यासविषयिका सदशिवब्रह्मेन्द्रस्य धारणा

१) पतञ्जलेः कृतिरियं सूत्रग्रन्थः। अतः पौनरुक्त्यं स्वीकार्यं न भवति। अतः केवलं स्मारणार्थम् एकतत्त्वाभ्यासपदं प्रयुक्तमिति अभ्युपगन्तुं न शक्यते।

२) पुनश्च विज्ञानभिक्षोः मतानुगुणम्[10] एकतत्त्वपदम् ईश्वरबोधकं तर्हि एकतत्त्वाभ्यासः इत्यपेक्षया ईश्वराभ्यासः इत्येव कथनं विचारे असन्दिग्धतां कर्तुं शक्नोति स्म। तच्च सूत्रकारैः नैव कृतम्। अतः ईश्वरप्रणिधानाद् विलक्षणः अयमभ्यासः। अत एकतत्त्वाभ्यासपदस्य च स्वारस्यं चिन्तनीयमिति भाति।

३) पुनश्च सर्वैः आद्रियमाणे व्यासभाष्ये चित्तस्य एकतत्त्वालम्बनता भवेत् इति स्पष्टं कथितं वर्तते। स चार्थविशेषः अपि न प्राप्यते यदि एकतत्त्वाभ्यास ईश्वरप्रणिधानाद् अभिन्न इति स्वीक्रियमाणे। अतः पूर्वोक्तैः कारणैरेकतत्त्वाभ्यास इत्यत्र कश्चन अर्थविशेषः अस्तीत्येव स्वीकरणीयं भवेदिति भाति।

वाचस्पतिमिश्रस्य मते एकतत्त्वम् ईश्वर इति कथितम्। किन्तु तदतिरिच्य अनुष्ठानविशेषः न कथित एतत्सूत्राधारेण। अत उक्तस्य सदाशिवब्रह्मेन्द्रस्य, वक्ष्यमाणस्य हरिहरानन्द-आरण्यस्य वा मतस्य परिशीलनेन वाचस्पतिमिश्रस्य विचारः अपि परिशीलित इति भावनीयम्। सदाशिवब्रह्मेन्द्रः, हरिहरानन्द-आरण्य इत्येतावुभौ अपि एकतत्त्वम् ईश्वर एव इति अभ्युपगच्छतः इति स्मरणार्हम्।

## ४.२ विज्ञानभिक्षोः मतम्

यदि हरिहरानन्द-आरण्योक्तदिशा ईश्वरविषयकस्य एकस्य विचारस्य पुनः पुनः अभ्यासः क्रियते केनचित्, तेनैव च यदि चित्तविक्षेपाणां निवृत्तिः सिद्धा भवति, तर्हि ईश्वरस्य एकतत्त्वत्वेन निषेधः यः कृतः विज्ञानभिक्षुणा स च अयुक्तः भवितुमर्हति। पुनश्च विज्ञानभिक्षुणा ईश्वरस्य एकतत्त्वरूपेण अभ्युपगमे अनेके दोषा उद्भाविताः, किन्तु ईश्वरभिन्नस्य यस्य कस्यचन तत्त्वस्य अभ्यासे कः गुणः स्यादिति नैव प्रपञ्चितम्। अतः विज्ञानभिक्षुविचारः अपि पूर्णतया उपादेयो वा इति चिन्त्यम्।

## ४.३ हरिहरानन्द-आरण्यस्य विचारः

विरुद्धयोः पक्षयोः सेतुनिर्माणे प्रयत्नं कृतवतः हरिहरानन्द-आरण्यस्य विचारः चिन्त्यते। यदि विज्ञानभिक्षूक्तरीत्या कस्यचन स्थूलादिवस्तुनः एकतत्त्वत्वेन अभ्यासं विधाय कश्चिच्चित्तविक्षेपराहित्यं प्राप्नुयात् तर्हि, आरण्यवर्यस्य विचारः अपि पुनः चिन्तनीयो भवेत्।

## ४.४ व्यासः भोजश्च

मूलव्याख्यातुः व्यासस्य, तद्व्याख्यासु अन्यतमायाः कर्तुः भोजस्य च विचारः अन्ते परामृश्यते। व्यासस्य वचनावलोकनेन- तद् एकं तत्त्वम् ईश्वर एव भवेदिति आग्रहो नास्ति, ईश्वरः न भवेत् अन्यदेव तत्त्वं भवेदित्यपि आग्रहः नास्ति- इति भाति। भोजः अपि

---

[10]यदि हीश्वरप्रणिधानमेव केवलमन्तरायाभावहेतुरिति वक्ष्यमाणसूत्रार्थः स्यात् तदा एकतत्त्वाभ्यास इति सामान्योपसंहारो न युज्येत, निस्सन्देहार्थम् ईश्वराभ्यास इत्येव वक्तुं युक्तत्वादिति भावः।

'अभिमत'पदप्रयोगेण एतत्तुल्यमेव स्वाभिप्रायं प्रकटयति। 'लोको भिन्नरुचिः' इत्यस्ति उक्तिः। अतः प्रत्येकं मनुष्यस्य सामर्थ्यानुगुणम् अभिरुच्यनुगुणं च ध्येयं वस्तु ईश्वरमपि अन्तर्भाव्य यत्किमपि भवितुमर्हति इति एतयोः विचारस्य विमर्शेन पर्यवस्यति।

## ५. उपसंहारः

अस्य अभ्यासस्य लक्ष्यं योगमार्गे प्रवृत्तस्य चित्तविक्षेपैः चेखिद्यमानचेतोवतः एकाग्रतासम्पादनद्वारा विक्षेपनिवारणम्। उपर्युक्तविचाराणां परामर्शेन इदं कथयितुं युक्तं स्याद् यद् व्यास-भोज-विज्ञानभिक्षूणां मतानुगुणं ध्यातुः "अभिमतं वस्तु" अत्र एकतत्त्वाभ्यासघटकीभूत-एकतत्त्वपदवाच्यं भवितुमर्हति। किन्तु अभिमतवस्तुकोटौ हरिहरानन्दारण्य-वाचस्पतिमिश्र-सदाशिवब्रह्मेन्द्राभिप्रेतस्य ईश्वरस्यापि अन्तर्भावः युक्त एव। नहि कश्चिद् ईश्वरः कस्यचिद् अभिमतवस्तु भवितुं नार्हतीति वक्तुं शक्नोति। इदम् एकतत्त्वपदविषयकं चिन्तनम्।

अस्य च एकतत्त्वस्य अभ्यासः- व्यास-हरिहरानन्दोक्तदिशा ध्येयत्वेन स्वीकृतस्य वस्तुन एकस्य एव अंशस्य चेतसि आवृत्तिरूपः भवितुम् अर्हति इति भाति। तदेव हि तुल्यप्रत्ययसन्ततिद्वारा चित्तविक्षेपनिवारणं भवति।[11] अतः च एकस्मिन् एव स्वाभिमते वस्तुनि (ईश्वरमपि अन्तर्भाव्य), तत्रापि ध्येयवस्तुनः एकस्मिन्नेव अंशे, चित्तस्य पुनः पुनः संस्थापनस्य प्रयत्नेन चित्तविक्षेपा निवारयितुं शक्यन्ते इति तत्प्रतिषेधार्थम् एकतत्त्वाभ्यास इत्यस्य सूत्रस्य अर्थः स्यात् इति शम्।

✦✦✦

## ग्रन्थसूची


1. साङ्गं योगदर्शनम्, अर्थात् पातञ्जलं दर्शनम्, पतञ्जलिरहस्य-तत्त्ववैशारदी-योगवार्त्तिक-भास्वती-व्याख्याभिः समलङ्कृतं योगसूत्रस्य व्यासभाष्यम्, संपादकः गोस्वामी दामोदरशास्त्री, चौखम्बा संस्कृतभवनम्, वाराणसी, १९९२
2. योगसुधाकरः (योगसूत्रवृत्तिः),सदाशिवब्रह्मेन्द्रः. आङ्ग्लानुवादेन सह, अनुवादकः एस्.कोदण्डरामः, कार्कोटक-वयलोर्-ट्रस्ट्, चेन्नै, १९९३
3. योगसूत्रव्यासभाष्यम्, भोजवृत्तिसहितम्, हिन्दीभाषानुवादसमेतम्, स्वामी विज्ञानाश्रमः, अजमेर, १९३१


[11] अत्र प्रकृतस्य एकतत्त्वाभ्यासस्य अग्रे योगसूत्रेषु वक्ष्यमाणस्य यथाभिमतध्यानस्य (यो.सू१.३९) च कः भेदः, अभिमतवस्तु स्वेच्छाविषयीभूतं वा तत्र गुरुशास्त्रसम्मतिरपेक्षिता वा इत्यादयः विचाराः प्रकृताश्चेदपि ते नात्र विचार्यन्ते लेखविस्तरभिया।